अनाधृष्यो जातवेदा ऽअनिष्टृतो व्विराडग्ने क्षत्रभृद्दीदिहीह ॥ व्विश्वा ऽआशाः प्प्रमुञ्चन्मानुषीर्ब्भियः शिवेभिरद्य परिपाहि नो व्वृधे ॥ ७ ॥

बृहस्प्पते सवितर्बोधयैनꣳ सꣳशितञ्चित्सन्तराꣳ सꣳ

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिंशाधि ॥ व्वर्द्धयैनं महते सौभगाय विश्वे ऽएनमनु मदन्तु देवाः ॥ ८ ॥

अमुत्रभूयादध यद्यमस्य बृहस्पते ऽअभिशंस्तेरमुञ्चः ॥
प्रत्यौहतामश्विना मृत्युमस्माद् देवानामग्ने भिषजा शचीभिः ॥९॥

ॐ विष्णोर्नु कं व्वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांᳬसि ॥ यो ऽअस्कभायदुत्तरᳬ सधस्थं विचक्रमाणस्त्रेधोरुगायो विष्णवे त्वा ॥ १ ॥

दिवो वा विष्ण ऽउत वा पृथिव्या महो वा विष्ण ऽउरोरन्तरिक्षात् ॥ उभा हि हस्ता व्वसुना पृणस्वा प्रयच्छ दक्षिणादोत सव्याद् विष्णवे त्वा ॥ २ ॥

प्र तद् विष्णुस्तवते व्वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥ ३ ॥

विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि ॥ व्वैष्णवमसि विष्णवे त्वा ॥ ४ ॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्ब्बाहुभ्यां पूष्णो हस्ताभ्याम् ॥ आददे नार्यसीदमहᳬ रक्षसाङ्ग्रीवा ऽअपि कृन्तामि ॥ बृहन्नसि बृहद्रवा बृहतीमिन्द्राय व्वाचं व्वद ॥ ५ ॥

आप्यायस्व समेतु ते व्विश्वतः सोम व्वृष्ण्यम् ।
भवा व्वाजस्य सङ्गथे ॥ ६ ॥

सन्ते पयांᳬसि समु यन्तु व्वाजाः सं व्वृष्ण्यान्यभिमातिषाहः ॥ आप्यायमानो ऽअमृताय सोम दिवि श्रवांᳬस्युत्तमानि धिष्व ॥ ७ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आप्यायस्व मदिन्तम सोम विश्वेभिरꣳशुभिः। भवा नः सप्रथस्तमः सखा वृधे ॥ ८ ॥

ॐ सप्त ते ऽअग्ने समिधः सप्त जिह्वाः सप्त ऽऋषयः सप्त धाम प्रियाणि ॥ सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्वा घृतेन स्वाहा ॥ १ ॥

शुक्रज्ज्योतिश्च चित्रज्ज्योतिश्च सत्यज्ज्योतिश्च ज्ज्योतिष्माँश्च ॥ शुक्रश्च ऽऋतपाश्चात्यꣳहाः ॥ २ ॥

ईदृङ् चान्यादृङ् च सदृङ् च प्रतिसदृङ् च ॥
मितश्च सम्मितश्च सभराः ॥ ३ ॥

ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च ॥
धर्त्ता च विधर्त्ता च विधारयः ॥ ४ ॥

ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च ॥
अन्तिमित्रश्च दूरे ऽअमित्रश्च गणः ॥ ५ ॥

ईदृक्षास ऽएतादृक्षास ऽऊषुणः सदृक्षासः प्रतिसदृक्षास ऽएतन ॥ मितासश्च सम्मितासो नो ऽअद्य सभरसो मरुतो यज्ञे ऽअस्मिन् ॥ ६ ॥

स्वतवाँश्च प्रघासी च सान्तपनश्च गृहमेधी च ॥
क्रीडी च शाकी चोज्जेषी ॥ ७ ॥

इन्द्रन्दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन्न्यथेन्द्रन्दैवीर्विशो मरुतोऽनुवर्त्मानोऽभवन् ॥ एवमिमं यजमानन्दैवीश्च विशो मानुषीश्चानुवर्त्मानो भवन्तु ॥ ८ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इमं स्तनमूर्ज्जस्वन्तं धयापां प्रपीनमग्ने सरिरस्य मद्ध्ये ॥
उत्सं जुषस्व मधुमन्तमर्व्वन्त्समुद्रियꣳ सदनमाविशस्व ॥ ९ ॥

घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ॥ अनुष्वधमावह मादयस्व स्वाहाकृतं व्वृषभ व्वक्षि हव्यम् ॥ १० ॥

ॐ वाजश्च० । प्राणश्च० । ओजश्च० । ज्यैष्ठ्यं च० । सत्यं च० । ऋतं च० । यन्ता च० । शं च० । ऊर्क् च० । रयिश्च० । वित्तं च० । व्रीहयश्च० । अश्मा च० । अग्निश्च म ऽआपश्च० । व्वसु च० । अग्निश्च म ऽइन्द्रश्च० । मित्रश्च० । पृथिवी च० । अꣳ० शुश्च० । आग्रयणश्च० । स्रुचश्च० । अग्निश्च मे घर्मश्च मे० । व्रतञ्च० । एका च० । चतस्रश्च० । त्र्यविश्च० । पष्ठवाट् च० । व्वाजाय स्वाहा० । आयुर्य्यज्ञेन० ॥

ॐ व्वसोः पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्रधारम् ॥ देवस्त्वा सविता पुनातु व्वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ ११ ॥

इदमग्नये वैश्वानराय न मम ।

अग्नेः प्रदक्षिणम्

ततो यजमानः—

ॐ अग्ने नय सुपथा राये ऽअस्मान् विश्वानि देव व्वयुनानि विद्वान् । युयोद्ध्युस्मज्जुहुराणमेनो भूयिष्ठां ते नम ऽउक्तिं विधेम ॥

CC-0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्यनेन मन्त्रेणाग्निं परिक्रम्य अग्नेः पश्चिमदिशि प्राङ्मुख-मुपविशेत् ।

हवनीयकुण्डभस्मधारणम्

तत आचार्यः हवनकुण्डस्य स्थण्डिलस्य वा ईशानकोणात् स्रुवेण भस्मानीय प्रथमं स्वशरीरे ततो यजमानशरीरे च भस्मानुलेपनं कुर्यात् । 'ॐ त्र्यायुषं जमदग्नेः' इति ललाटे । 'कश्यपस्य त्र्यायुषम्' इति ग्रीवायाम् । 'यद्देवेषु त्र्यायुषम्' इति दक्षिणबाहुमूले । 'तन्नो ऽअस्तु त्र्यायुषम्' इति हृदि ।

संस्रवप्राशनम् । आचमनम् । पवित्राभ्यां मार्जनम् । अग्नौ पवित्र-प्रतिपत्तिः । ब्रह्मणे पूर्णपात्रदानम् । पूर्णपात्रग्रहणानन्तरं 'ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु' इति ब्रह्मा वदेत् । ततो ब्रह्मग्रन्थिविमोकः । पश्चादग्नेः पश्चिमतः प्रणीताविमोकः । "ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्ते कृण्वन्तु भेषजम्" इत्यनेन यजमानमुपयमनकुशैर्मार्जयेत् । तत उपयमनकुशानामग्नौ प्रक्षेपः ।

अवभृथस्नानं गोदानं दक्षिणादानादिकं च

यजमानः आचार्यादिब्राह्मणैः सह अवभृथस्नानार्थं नद्यादौ गत्वा अवभृथस्नानं कुर्यात् । अथवा स्वगृहे एव प्रधानकलशोदकेन स्नानं कुर्यात् । ततो यजमानः आचार्याय गोदानं प्रधानपीठादिकं च दद्यात् । पश्चात् ब्रह्मादिऋत्विग्भ्यः वृष–अश्व-रथ–गन्त्रीं (पालकीम्) च दद्यात् । अनन्तरं आचार्यादिऋत्विग्भ्यः अन्येभ्यश्च सुवर्णं दद्यात् ।

ततो ब्राह्मणभोजनसङ्कल्पं भूयसीदक्षिणासङ्कल्पं च कृत्वा छायापात्र-दानं कुर्यात् । तत आचार्यः यजमानाय श्रेयोदानं दद्यात् । आचार्यः "कृतस्य सनवग्रहमखशतचण्डीयागकर्मणः साङ्गतासिद्ध्यर्थं तत्सम्पूर्ण-फलप्राप्त्यर्थं च यजमानाय श्रेयोदानं करिष्ये" इति सङ्कल्प्य, 'शिवा आपः सन्तु' इति यजमानदक्षिणहस्ते जलं दद्यात् । 'सौमनस्यमस्तु' इति पुष्पं दद्यात् । 'अक्षतं चारिष्टं चास्तु' इति अक्षतान् दद्यात् । तत

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आचार्यः हस्ते जलाक्षतपूगीफलमादाय "भवन्नियोगेन मया अस्मिन् शतचण्डीयागकर्मणि यत्कृतं आचार्यत्वं तथा च एभिर्ब्राह्मणैः सह यत्कृतं दुर्गापाठ-जप-हवनादिकं च तेनोत्पन्नं यच्छ्रेयस्तत् साक्षतेन सजलेन पूगीफलेन तुभ्यमहं सम्प्रददे ।" तेन श्रेयसा त्वं श्रेयोवान् भव, इत्युक्त्वा यजमानाय अर्पयेत् । 'भवामि' इति यजमानो ब्रूयात् ।

उत्तरपूजनम्

ततो यजमानः प्रधानपीठादीनां विशेषतः श्रीभगवत्याः दुर्गायाः षोडशोपचारैः पञ्चोपचारैर्वा पूजनं कुर्यात् ।

कूष्माण्डबलिदानम्

आचम्य प्राणानायम्य । 'ॐ अपवित्रः पवित्रो वा०' इत्यात्मानं सम्प्रोक्ष्य दुर्गादेव्याः षोडशोपचारैः पञ्चोपचारैर्वा पूजनं कुर्यात् । ततः सङ्कल्पं कुर्यात् । देशकालौ सङ्कीर्त्य "गोत्रः शर्माऽहम् (वर्माऽहम, गुप्तोऽहम्) मम सकुटुम्बस्य सपरिवारस्य सर्वारिष्टनिरसनपूर्वकं सर्वाभीष्टफलप्राप्त्यर्थं च श्रीदुर्गादेवीप्रीत्यर्थं कूष्माण्डबलिदानं करिष्ये ।" ततः कूष्माण्डबलिं गन्धाक्षतपुष्पादिभिः सम्पूजयेत् ।

पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः ।
प्रणमामि ततः सर्वरूपिणं बलिरूपिणम् ॥ १ ॥
चण्डिकाप्रीतिदानेन दातुरापद् विनाशनम् ।
चामुण्डाबलिरूपाय बले ! तुभ्यं नमोऽस्तु ते ॥ २ ॥
यज्ञार्थं बलयः सृष्टाः स्वयमेव स्वयम्भुवा ।
अतस्त्वां घातयाम्यद्य यस्माद् यज्ञे वधोऽवधः ॥ ३ ॥

इति बलिमभिमन्त्रयेत् । ततः 'ऐं ह्रीं श्रीम्' इति गन्धाक्षतपुष्पाणि क्षिपेत् ।

'रसना त्वं चण्डिकाया सुरलोकप्रसाधकः' इति ।

ततः 'ह्रां ह्रीं खड्ग आं हुं फट्' इति खड्गं (शस्त्रं) सम्पूज्य स्वदक्षिणहस्ते खड्गं गृहीत्वा दुर्गादेवीं स्मरेत् प्रणमेच्च । ततः "ॐ कालि कालि यज्ञेश्वरि (वज्रेश्वरि) लोहदण्डायै नमः" इत्युक्त्वा कूष्माण्डबलिं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्त्तयेत् (छेदयेत्)। पश्चात् "ॐ ह्रीं ऐं ह्रीं कौशिकि रुधिरेणाप्यायताम्" इति देव्यै अर्घं निवेदयेत्। ततः कर्त्तितस्य कूष्माण्डबलेः पञ्च भागान् कृत्वा पूतनादिभ्यः बलिं दद्यात्। तद्यथा—पूतनायै बलिभागं निवेदयामि। चरक्यै बलिभागं निवेदयामि। पापराक्षस्यै बलिभागं निवेदयामि। विदार्यै बलिभागं निवेदयामि। क्षेत्रपालाय बलिभागं निवेदयामि।

अथवा—माषपिष्टमयं पशुं कृत्वा खड्गेन कर्त्तयित्वा स्कन्दाय विशिखाय च बलिं दद्यात्। तद्यथा—स्कन्दाय पश्वर्धं समर्पयामि। विशिखाय पश्वर्धं समर्पयामि।

'ॐ ह्रीं स्फुर स्फुर ॐ हुं फट् मर्द मर्द हुम्' इति बलिशेषभागं गृहाद् बहिर्दद्यात्। तत आचमनं मार्जनादिकं च कृत्वा दुर्गादेवीं प्रार्थयेत्।

नमो देव्यै महादेव्यै शिवायै सततं नमः।
नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥ १॥

शरणागतदीनार्तपरित्राणपरायणे।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते॥ २॥

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते॥ ३॥

महिषघ्नि महामाये चामुण्डे मुण्डमालिनि।
आयुरारोग्यमैश्वर्यं देहि देवि नमोऽस्तु ते॥ ४॥

रूपं देहि जयं देहि भगं भगवति देहि मे।
पुत्रान् देहि धनं देहि सर्वकामांश्च देहि मे॥ ५॥

ततः कर्पूरार्तिक्यं मन्त्रपुष्पाञ्जलिं च कुर्यात्।

तर्पणं मार्जनं च

ततो ब्राह्मणाः बृहत्पात्रे दुग्धं जलं वा दत्त्वा कुशैः दूर्वाभिर्वा 'ॐ दुर्गां तर्पयामि' इति तर्पणम्, 'ॐ दुर्गां मार्जयामि' इति च मार्जनं कुर्युः। ततश्छायापात्रदानम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभिषेकः

तत आचार्यं रुद्रकलश-प्रधानकलशयोर्जलमेकस्मिन् पात्रे एकीकृत्य तज्जलेन दूर्वा-कुशा-आम्रपल्लवैः प्राङ्मुखं सपरिवारं यजमानमभिषिञ्चेत्।

अभिषेकमन्त्राः

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥ सरस्वत्यै व्वाचो यन्तुर्यन्त्रियें दधामि बृहस्पतेष्ट्वा साम्राज्येनाभिषिञ्चाम्यसौ॥ १॥

देवस्य त्वा०। सरस्वत्यै व्वाचो यन्तुर्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि॥ २॥

देवस्य त्वा०। अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन व्वीर्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि॥ ३॥

ॐ शिरो मे श्रीर्यशो मुखं त्विषिः केशाश्च श्मश्रूणि। राजा मे प्राणो ऽअमृतंꣳ सम्राट् चक्षुर्व्विराट् श्रोत्रम्॥ ४॥

जिह्वा मे भद्रं व्वाङ् महो मनो मन्युः स्वराड् भामः।
मोदाः प्रमोदा ऽअङ्गुलीरङ्गानि मित्रं मे सहः॥ ५॥

बाहू मे बलमिन्द्रियꣳ हस्तौ मे कर्म्म व्वीर्यम्।
आत्मा क्षत्रमुरो मम॥ ६॥

पृष्ठीर्म्मे राष्ट्रमुदरमꣳसौ ग्रीवाश्च श्रोणी।
ऊरू ऽअरत्नी जानुनी व्विशो मेऽङ्गानि सर्व्वतः॥ ७॥
नाभिर्म्मे चित्तं व्विज्ञानं पायुर्म्मेऽपचितिर्भसत्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः। जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः ॥ ८ ॥

प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रति तिष्ठामि गोषु। प्रत्यङ्गेषु प्रति तिष्ठाम्यात्मन् प्रति प्राणेषु प्रति तिष्ठामि पुष्टे प्रति द्यावापृथिव्योः प्रति तिष्ठामि यज्ञे ॥ ९ ॥

त्रया देवा एकादश त्रयस्त्रिंशाः सुराधसः। बृहस्पतिपुरोहिता देवस्य सवितुः सवे। देवा देवैरवन्तु मा ॥ १० ॥

प्रथमा द्वितीयैर्द्वितीयास्तृतीयैस्तृतीयाः सत्येन सत्यं यज्ञेन यज्ञो यजुर्भिर्यजूंषि सामभिः सामान्यृग्भिर्ऋचः पुरोऽनुवाक्याभिः पुरोऽनुवाक्या याज्याभिर्याज्या वषट्कारैर्वषट्कारा आहुतिभिराहुतयो मे कामान्त्समर्द्धयन्तु भूः स्वाहा ॥ ११ ॥

ॐ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः।
सचेतसो विश्वे देवा यज्ञं प्रावन्तु नः शुभे ॥ १२ ॥

ॐ त्वं यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः।
रक्षा तोकमुतत्मना ॥ १३ ॥

ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्ज्जे दधातन।
महे रणाय चक्षसे ॥ १४ ॥

यो वः शिवतमो रसस्तस्य भाजयतेह नः।
उशतीरिव मातरः ॥ १५ ॥

तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ।
आपो जनयथा च नः ॥ १६ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वे देवाः शान्तिर्ब्रह्म शान्तिः सर्वꣳ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ १७ ॥

ॐ यतोयतः समीहसे ततो नो ऽअभयं कुरु।
शन्नः कुरु प्रजाभ्योऽभयं नः पशुभ्यः ॥ १८ ॥

ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ १९ ॥

ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यम्।
भवा वाजस्य सङ्गथे ॥ २० ॥

ॐ पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतसः।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥ २१ ॥

ॐ विश्वानि देव सवितर्दुरितानि परासुव।
यद् भद्रं तन्न ऽआ सुव ॥ २२ ॥

पुराणमन्त्रैरभिषेकः

सुरास्त्वामभिषिञ्चन्तु ब्रह्म-विष्णु-महेश्वराः।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ॥ १ ॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते।
आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥ २ ॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः।
ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा ॥ ३ ॥
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः।
बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्च मातरः ॥ ४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ।
आदित्यश्चन्द्रमा भौमो बुध-जीव-सितार्कजाः ॥ ५ ॥

ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ।
देव-दानव-गन्धर्वा यक्ष-राक्षस-पन्नगाः ॥ ६ ॥

ऋषयो मुनयो गावो देवमातर एव च ।
देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः ॥ ७ ॥

अस्त्राणि सर्वशास्त्राणि राजानो वाहनानि च ।
औषधानि च रत्नानि कालस्यावयवाश्च ते ॥ ८ ॥

सरितः सागराः शैलास्तीर्थानि जलदा नदाः ।
एते त्वामभिषिञ्चन्तु धर्मकामार्थसिद्धये ॥ ९ ॥

क्षमा-प्रार्थना

पापोऽहं पापकर्माऽहं पापात्मा पापसम्भवः ।
त्राहि मां देवि चण्डेशि सर्वपापहरा भव ॥ १ ॥

आवाहनं न जानामि न जानामि विसर्जनम् ।
पूजां चैव न जानामि क्षमस्व परमेश्वरि ॥ २ ॥

यत्पूजितं मया देवि भक्तिश्रद्धाविवर्जितम् ।
तत्सर्वं परिगृह्णन्तु दुर्गाद्याः सर्वदेवताः ॥ ३ ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वरि ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥ ४ ॥

जपच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि ।
सर्वं भवतु मेऽच्छिद्रं ब्राह्मणानां प्रसादतः ॥ ५ ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन क्षमस्व परमेश्वरि ॥ ६ ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व परमेश्वरि ॥ ७ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ज्ञानतोऽज्ञानतो वापि यन्न्यूनमधिकं कृतम् ।
तत्सर्वं क्षम्यतां देवि प्रसीद परमेश्वरि ॥ ८ ॥
कर्मणा मनसा वाचा पूजनं यन्मया कृतम् ।
तेन तुष्टिं समासाद्य प्रसीद परमेश्वरि ॥ ९ ॥

देवविसर्जनम्

ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तंस्त्वेमहे । उप प्प्रयन्तु मरुतः सुदानव ऽइन्द्र प्प्राशूर्भवा सचा ॥ १ ॥

ॐ यज्ञं यज्ञङ्गच्छ यज्ञपतिङ्गच्छ स्वां योनिङ्गच्छ स्वाहा । एष ते यज्ञो यज्ञपते सहसूक्तवाकः सर्व्ववीरस्तञ्जुषस्व स्वाहा ॥ २ ॥

ॐ समुद्रं गच्छ स्वाहाऽन्तरिक्षं गच्छ स्वाहा देवꣳ सवितारं गच्छ स्वाहा मित्रावरुणौ गच्छ स्वाहाऽहोरात्रे गच्छ स्वाहा छन्दाꣳसि गच्छ स्वाहा द्यावापृथिवी गच्छ स्वाहा यज्ञं गच्छ स्वाहा सोमं गच्छ स्वाहा दिव्यं नभो गच्छ स्वाहाऽग्निं व्वैश्वानरं गच्छ स्वाहा मनो मे हार्दि यच्छ दिवं ते धूमो गच्छतु स्वुर्ज्ज्योतिः पृथिवीं भस्मनापृण स्वाहा ॥

उत्तिष्ठ देवि चण्डेशि शुभां पूजां प्रगृह्य च ।
कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह ॥ १ ॥
दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते ।
यत्पूजितं मया देवि परिपूर्णं तदस्तु मे ॥ २ ॥
पूजामिमां मया देवि यथाशक्त्युपपादिताम् ।
रक्षार्थं त्वं समादाय व्रज स्वस्थानमुत्तमम् ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यान्तु देवगणाः सर्वे पूजामादाय मामिकाम् ।
इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ॥ ४ ॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वरि ।
यत्र ब्रह्मादयो देवा तत्र गच्छ हुताशन ॥ ५ ॥
प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद् विष्णोः सम्पूर्णं स्यादिति श्रुतिः ॥ ६ ॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥ ७ ॥

यजमानः—'ॐ विष्णवे नमः' इति त्रिर्वदेत् ।

यजमानरक्षाबन्धनमन्त्रः

ॐ यदाबध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः । तन्म ऽआ बध्नामि शतशारदायायुष्माञ्जरदष्टिर्यथासम् ॥

यजमानपत्नीरक्षाबन्धनमन्त्रः

ॐ तं पत्नीभिरनुगच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः ॥ नाकं गृभ्णानाः सुकृतस्य लोके तृतीये पृष्ठे ऽअधि रोचने दिवः ॥

यजमान-तिलककरणम्

आदित्या वसवो रुद्रा विश्वेदेवा मरुद्गणाः ।
तिलकं ते प्रयच्छन्तु कामधर्मार्थसिद्धये ॥

इति मन्त्रेण आचार्यः यजमानमस्तके कुङ्कुमादिना तिलकं कुर्यात् ।

येऽक्षताः क्षतहन्तारो हन्तारोऽखिलवैरिणाम् ।
ताँस्ते मूर्ध्नि प्रयच्छामि तेन ते शं सदा भवेत् ॥

इति मन्त्रेण तिलकमध्ये अक्षतान् विदध्यात् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यजमानायाशीर्वादः

ॐ पुनस्त्वाऽऽदित्या रुद्रा व्वसवः समिन्धतां पुनर्ब्रह्माणो व्वसुनीथ यज्ञैः। घृतेन त्वं तन्वं व्वर्द्धयस्व सत्याः सन्तु यजमानस्य कामाः॥ १॥

ॐ दीर्घायुस्त ऽओषधे खनिता यस्मै च त्वा खनाम्यहम्॥ अथो त्वं दीर्घायुर्भूत्वा शतवल्शा व्वि रोहतात्॥ २॥

ॐ व्विवस्वन्नादित्यैष तें सोमपीथस्तस्मिन् मत्स्व। श्रदस्मै नरो व्वचसे दधातन यदाशीर्दा दम्पती व्वाममश्नुतः। पुमान् पुत्रो जायते व्विन्दते व्वस्वधा व्विश्वाहारप ऽएधते गृहे॥ ३॥

ॐ स्वस्ति न ऽइन्द्रो व्वृद्धश्रवाः स्वस्ति नः पूषा व्विश्ववेदाः। स्वस्ति नस्ताक्ष्र्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ ४॥

श्रीर्वर्चस्वमायुष्यमारोग्यमाविधात् पवमानं महीयते॥
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः॥ ५॥

शान्तिरस्तु शिवं चास्तु शुभं चास्तु धनं तथा।
ऋद्धिरस्तु वृद्धिरस्तु ब्राह्मणानां प्रसादतः॥ १॥

अपुत्राः पुत्रिणः सन्तु पुत्रिणः सन्तु पौत्रिणः।
निर्धनाः सधनाः सन्तु जीवन्तु शरदां शतम्॥ २॥

मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव॥ ३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यजमानपत्न्या आशीर्वादः

ॐ अनाधृष्टा पुरस्तादग्नेराधिपत्य ऽआयुर्म्मे दाः पुत्रवती दक्षिणत ऽइन्द्रस्याधिपत्ये प्रजां मे दाः सुषदा पश्चाद्देवस्य सवितुराधिपत्ये चक्षुर्म्मे दा ऽआश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषं मे दाः ॥ विधृतिरुपरिष्टाद् बृहस्पतेराधिपत्य ऽओजो मे दा विश्वाभ्यो मा नाष्ट्राभ्यस्पाहि मनोरश्वासि ॥ १ ॥

ॐ यावती द्यावापृथिवी यावच्च सप्त सिन्धवो वितस्थिरे । तावन्तमिन्द्र ते ग्रहमूर्जा गृह्णाम्यक्षितं मयि गृह्णाम्यक्षितम् ॥२ ॥

ॐ श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणामुं म ऽइषाण सर्व्वलोकं म ऽइषाण ॥ ३ ॥

ततो यजमानाय प्रसादार्पणम् ।

इति शतचण्डीपाठस्य हवनादिविधिः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिशिष्ट—भाग

[दुर्गाके पाठ, हवन, बलिदान आदि विविध महत्त्वपूर्णं विषयोंपर विचार]

लेखक

वेणीराम गौड़ वेदाचार्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

❀ श्रीहरिः ❀

१. शतचण्डी ९ दिनमें अथवा ५ दिनमें होती है। ५ दिनमें होनेवाली शतचण्डीमें वृद्धिक्रमसे दुर्गाका पाठ होता है। इसमें प्रथम दिन एक पाठ, द्वितीय दिन दो पाठ, तृतीय दिन तीन पाठ, चतुर्थ दिन चार पाठ और पञ्चम दिन पाँच पाठकर शतचण्डी समाप्त करना चाहिये। 'पञ्चमेऽहनि समाप्तिः स्यात्' ऐसा लिखा भी है।

नव दिनकी शतचण्डीमें दुर्गापाठ करनेवाले १० ब्राह्मण होने चाहिये। आचार्य, ब्रह्मा आदि अलग होते हैं। पाँच दिनकी शतचण्डीमें वृद्धिक्रमसे दुर्गापाठ करनेके लिये १० ब्राह्मण होने चाहिये। आचार्य और ब्रह्मा पृथक् होते हैं।

शतचण्डीमें हवन-सामग्री सवा मन लगती है।

२. कुछ आचार्योंका मत है कि शतचण्डी ऐसे दिन प्रारम्भ करना चाहिये, जिससे दुर्गाके १०० पाठ अष्टमी, नवमी, चतुर्दशी अथवा पूर्णिमाको पूर्ण हो जायँ।

३. शतचण्डी अथवा सहस्रचण्डीका दशांश हवन दुर्गाके ७०० श्लोकोंसे अथवा केवल नवार्ण-मन्त्रसे अथवा 'नमो देव्यै महादेव्यै०' इस मन्त्रसे अथवा 'जयन्ती मङ्गला काली०' इस मन्त्रसे किया जा सकता है।

४. शतचण्डीके दशांश हवनमें 'ॐ नमो देव्यै महादेव्यै०' इस मन्त्रसे १० माला अथवा एक मालाद्वारा 'ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे' इस नवार्णमन्त्रसे १० माला अथवा १ मालाद्वारा हवन करना चाहिये।

५. नवार्णमन्त्रका केवल घृतसे ही हवन करना चाहिये।

६. नवरात्रिमें नवमीको ही हवन करना चाहिये अथवा अपनी कुलपरम्पराके अनुसार अष्टमी या नवमीको दिनमें अथवा रात्रिमें हवन करना चाहिये। अथवा अष्टमी और नवमीकी सन्धिमें हवन करना चाहिये।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

७. नवमीको बलिदान करनेसे ऐश्वर्यकी प्राप्ति होती है—

नवम्यां बलिदानं तु कर्तव्यं वै यथाविधि ।
जपं होमं च विधिवत् कुर्यात्तत्र विभूतये ।।

(कालिकापुराण)

'नवमी तिथिको यथाविधि बलिदान करना चाहिये। ऐश्वर्यकी प्राप्तिके लिये विधिवत् जप और हवन करना चाहिये।'

नवम्यामपराह्णेन बलिदानं प्रशस्यते ।
दशमीं वर्जयेत्तत्र नात्र कार्या विचारणा ।।

(कालिकापुराण)

'नवमी तिथिको अपराह्णमें बलिदान करना प्रशस्त कहा गया है। बलिदानके लिये दशमी तिथिका परित्याग कर देना चाहिये, इसमें विचारकी आवश्यकता नहीं है।'

८. अष्टमी तिथिको बलिदान करनेसे हानि होती है—

'बलिदाने कृतेऽष्टम्यां पुत्रभङ्गो भवेन्नृप।'

(देवीपुराण)

'हे नृप ! अष्टमी तिथिको बलिदान करनेसे पुत्रका भङ्ग होता है।'

'अष्टम्यां बलिदानेन पुत्रनाशो भवेद् ध्रुवम्।'

(कालिकापुराण)

'अष्टमी तिथिको बलिदान करनेसे निश्चित ही पुत्रका नाश होता है।'

९. दुर्गा देवीका विसर्जन नवमी और दशमी दोनों ही दिन हो सकता है। वस्तुतः दुर्गाका विसर्जन दशमीको प्रातःकाल करना उचित है।

१०. दुर्गासप्तशतीका एक ही दिनमें कई पाठ करना हो, तो कवच, अर्गला, कीलकका प्रथम बार अर्थात् एक ही बार पाठ करना चाहिये, बार-बार नहीं। रहस्यत्रयका पाठ दुर्गापाठके अन्तवाले पाठमें करना चाहिये।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

११. नवार्ण-मन्त्रका जप दुर्गापाठके सभी पाठमें आद्यन्तमें करना चाहिये और रात्रिसूक्त तथा देवीसूक्त प्रत्येक दुर्गापाठमें करना चाहिये।

१२. दुर्गापाठ करते समय अध्यायके अन्तमें 'इति' कहनेसे लक्ष्मीका नाश, 'वध' कहनेसे कुलका नाश और 'अध्याय' कहनेसे अपने प्राणका नाश होता है। अतः केवल 'मार्कण्डेयपुराणे' इत्यादि कहना चाहिये।

इति शब्दो हरेल्लक्ष्मीं वधः कुलविनाशकः।
अध्यायो हरते प्राणान् मार्कण्डेयादिकं वदेत्॥

१३. दुर्गाके सम्पुटित पाठमें भी दुर्गासप्तशतीके ७०० मन्त्रोंसे ७०० ही आहुति देनी चाहिये, यह 'दुर्गोपासनाकल्पद्रुम' में लिखा है।

कदाचित्सम्पुटैर्युक्तं पठेत्सप्तशतीस्तवम्।
ससम्पुटं पठेद् होमो हुनेत् सप्तशताहुतीः॥

१४. सात्त्विक मनुष्योंको दुर्गापूजामें कूष्माण्ड, नारिकेल, इक्षुदण्ड, नीबू और उड़द आदिकी बलि देनी चाहिये।

१५. दक्षिण दिशामें दुर्गाका मुख कर स्थापन करनेसे वह शुभ देनेवाली, पूर्व दिशामें मुख कर स्थापन करनेसे जयको देनेवाली और पश्चिम दिशामें मुख कर स्थापन करनेसे प्रत्येक कार्यको सिद्ध करनेवाली कही गयी है। उत्तर दिशामें मुख कर दुर्गाकी स्थापना नहीं करना चाहिये।

याम्यास्या शुभदा दुर्गा पूर्वास्या जयवर्द्धिनी।
पश्चिमाभिमुखी नित्या न स्थाप्या सौम्यदिङ्मुखी॥

१६. शतचण्डी, सहस्रचण्डी आदिमें १०० अथवा ९ अथवा १ कुमारीका प्रतिदिन पूजन करना चाहिये। अथवा यथाशक्ति कुमारीका पूजन करना चाहिये। अथवा प्रतिदिन एक-एक कन्याकी संख्याका वृद्धि कर उसका पूजन करना चाहिये।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१७ शतचण्डी, सहस्रचण्डी आदिमें जाति-भेदसे कन्याके पूजनका अलग-अलग फल इस प्रकार लिखा है—

(क) विप्रां सर्वेष्टसंसिद्धयै यशसे क्षत्रियोद्भवाम् ।
वैश्यजां धनलाभाय पुत्राप्त्यै शूद्रजां यजेत् ॥

(ख) ब्राह्मणीं सर्वकार्येषु जयार्थे नृपवंशजाम् ।
लाभार्थे वैश्यवंशोत्थां सुतार्थे शूद्रवंशजाम् ॥
दारुणे चान्त्यजातीयां पूजयेद् विधिना नरः ॥

१८. शतचण्डो आदिमें पूजनार्थ वर्ज्य कन्या इस प्रकार कही गयी हैं—

हीनाधिकाङ्गीं कुष्ठाधिविकारां कुकुलां तथा ।
ग्रन्थिस्फुटितसर्वाङ्गां रक्तपूयव्रणाङ्किताम् ॥
जात्यन्धां केकरां काणां कुरूपां तनुरोमशाम् ।
सन्त्यजेद्रोगिणीं कन्यां दासीगर्भसमुद्भवाम् ॥

१९. शतचण्डी और सहस्रचण्डी सर्वदा की जा सकती है। इसके लिये उत्तरायण और दक्षिणायनका विचार अनावश्यक है।

२०. शतचण्डो अथवा सहस्रचण्डीमें अखण्ड दीपक यदि बुझ जाय, तो 'ॐ जयन्ती मङ्गला काली' इस मन्त्रसे अथवा 'ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे' इस नवार्ण-मन्त्रसे अथवा 'ॐ देवि! प्रपन्नार्तिहरे प्रसीद०' (दुर्गा ११।३) से पाठका दशांश हवन करे। अथवा 'करोतु सा नः शुभहेतुरीश्वरी शुभानि भद्राण्यपहन्तु चापदः' (दुर्गा ५।८१) इस मन्त्रसे दशांश हवन करे।

२१. नवरात्रिका पर्व प्रतिवर्ष चार बार आता है—चैत्र, आश्विन, आषाढ़ और माघमें।

चैत्रेऽऽश्विने तथाऽऽषाढ़े माघे कार्यो महोत्सवः ।
नवरात्रे महाराज पूजा कार्या विशेषतः ॥
(देवीपुराण ३।२४।२१)

आश्विने मधुमासे वा तपोमासे शुचौ तथा ।
चतुर्षु नवरात्रेषु विशेषात्फलदायकम् ॥
(देवीभागवत, माहात्म्य १।३१)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२२. दुर्गायज्ञमें 'दुर्गासप्तशती' के द्वारा हवन होता है। प्रतिदिन अथवा पूर्णाहुतिके दिन 'दुर्गासहस्रनामावली' (देवीसहस्रनामावली) से हवन करना चाहिये। दुर्गायज्ञमें हवन करनेवाले ९ विद्वान् होते हैं। आचार्य, ब्रह्मा और द्वारपाल आदि सब मिलाकर २१ अथवा १६ विद्वान् होते हैं। यह यज्ञ ९ दिनमें होता है। दुर्गायज्ञमें हवनसामग्री १५ मन अथवा १० मन लगती है।

२३. जो मनुष्य प्रतिदिन दुर्गाका पाठ करता है, उसकी अकाल मृत्यु नहीं होती और उसकी सुखपूर्वक ज्ञानावस्थामें मृत्यु होती है।

२४. जो मनुष्य प्रतिदिन प्रातःकाल सूर्योदयके पूर्व और सायङ्काल दीपक जलनेके अनन्तर दुर्गाके मन्दिरमें अथवा दुर्गाके चित्रको अपने सामने रखकर घृतका दीपक जलाकर दुर्गाका ध्यान करता हुआ दुर्गासप्तशतीके चतुर्थाध्यायकी 'शक्रादिस्तुति' का पाठ करता है, वह विघ्न-बाधाओंसे सर्वदा मुक्त रहता है और उसको मनोभिलषित वस्तुओंकी प्राप्ति होती है।

२५. जो मनुष्य निशीथ कालके बाद घृतका दीपक जलाकर दुर्गाका ध्यान करता हुआ 'ॐ दुर्गे स्मृता०' इस मन्त्रका प्रतिदिन ११ माला जप करता है, उसको धनकी प्राप्ति होती है और उसकी सर्वविघ विपत्तियाँ दूर हो जाती हैं।

२६. जो मनुष्य 'ॐ शूलेन पाहि नो देवि०' इस मन्त्रको १२५०००० (बारह लाख पचास हजार) बार जपकर सिद्ध कर लेता है, वह उक्त मन्त्रको ९ बार कहकर जिसको झाड़ देता (फूंक देता) है उसका अर्धकपारी (मस्तकका आधा दर्द) रोग दूर हो जाता है।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुर्गोपासनामें पशु-बलिका विचार

'कलौ चण्डीविनायकौ' के अनुसार कलियुगमें दुर्गा और गणेशकी विशेष प्रधानता कही गयी है। इसीलिये कलियुगमें दुर्गाकी विशेष महत्ता है।

दुर्गाकी उपासना नित्य और काम्य-भेदसे सर्वदा की जाती है। दुर्गाकी उपासनामें कुछ लोग 'पशु-बलि' भी करते हैं, जोकि कलियुगमें वर्ज्य है। जिस प्रकार कलियुगमें गवालम्भन प्रभृति त्याज्य हैं, उसी प्रकार कलियुगमें पशु-बलि भी त्याज्य है।

वैदिक यज्ञोंमें पशुकी हिंसा मीमांसादि शास्त्रोंके द्वारा विहित होने पर भी सर्वशास्त्र-सम्मत नहीं है। सांख्यदर्शनके प्रणेता कपिल मुनिने यज्ञीय हिंसाको भी प्रत्यवाय कहा है।

श्रौतयज्ञमें बलिदानकी जो विधि है, उसे बहुत लोग क्षेपक कहते हैं। शतपथब्राह्मण (३।२।२।९) में वनस्पतियोंको 'यज्ञिय' कहा गया है। अतः पशुओंकी बलि न कर उसके अनुकल्प (बदले) में वनस्पतियोंके द्वारा कार्य किया जा सकता है। अतः श्रौतयज्ञमें साक्षात् पशुबलि न कर उसके स्थानपर वनस्पति अथवा आटेके पिण्ड आदिसे ही काम चलाना चाहिये।

श्रौतयज्ञमें पशु-बलिका जो विधान है, वह अन्य युगके लिये है, कलियुगके लिये नहीं। अतः कलियुगमें पशु-बलि सर्वथा निषिद्ध और निन्दनीय है।

वेदों तथा तदनुयायि शास्त्रोंमें जहाँ पशुहिंसाके वचन मिलते हैं, वहीं पर **'अहिंसा वैदिकी प्रोक्ता'** इत्यादि वचन भी प्राप्त हैं। मनुस्मृति, याज्ञवल्क्यस्मृति आदि धर्मशास्त्रके ग्रन्थोंमें कलिवर्ज्य-प्रकरणमें पशुहिंसानिषेधपरक सामान्य तथा विशेष अनेकों प्रमाण उपलब्ध हैं।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शास्त्रोंमें 'मा हिंस्यात्सर्वा भूतानि' जो लिखा है, यह वस्तुतः जीवमात्रकी हिंसाका निषेधक है। अतः जीवहिंसाके अनुकल्पमें कूष्माण्ड, नारिकेल, इक्षुदण्ड, उड़द आदिका उपयोग करना चाहिये।

वेदादि शास्त्रोंमें पशु-बलिके स्थानपर प्रतिनिधिरूपसे कूष्माण्ड, नारिकेल, इक्षुदण्ड, नीबू, उड़द आदि [1]बलि-द्रव्य स्वीकार किया है, जो कि तत्तत्स्थानोंमें यह विधान प्रचलित भी है। अतः सभीको देवी-देवताके पूजनमें पशुबलिके स्थानमें कूष्माण्ड, नारियल आदिकी बलि करनी चाहिये। लिखा भी है—

'पूजोत्तरं माषभक्तबलिं कूष्माण्डादिबलिं वा निवेदयेत्।'

(रुद्रयामल)

'पूजाके अनन्तर उड़दकी बलि अथवा कूष्माण्डकी बलि देवी-देवताको समर्पित करे।'

कृत्वा घृतमयं व्याघ्रं नरं सिंहं तथैव च।
पूजोत्तरं च देवाग्रे बलिरूपेण अर्पयेत्॥

(स्कन्दपुराण)

'घृतका व्याघ्र (बाघ), मनुष्य अथवा सिंह बनाकर, पूजाके अनन्तर देवताके सम्मुख बलिरूपमें अर्पित करे।'

अतः सात्त्विक प्रकृतिके मनुष्योंको पशुबलि नहीं करनी चाहिये। सात्त्विक मनुष्योंको जीवहत्या करनेका निषेध किया गया है—

सात्त्विको जीवहत्यां वै कदाचिदपि नाचरेत्।
इक्षुदण्डञ्च कूष्माण्डं तथा वन्यफलादिकम्॥
क्षीरपिण्डैः शालिचूर्णैः पशुं कृत्वा चरेद् बलिम्॥

(महाकालसंहिता)

'सात्त्विक मनुष्यको कदापि जीवहत्या नहीं करनी चाहिये। वह इक्षुदण्ड, कूष्माण्ड और बनके फलादिकी बलि दे अथवा खीरके पिण्ड और चावलके पिसे हुए पिण्डका पशु बनाकर बलि दे।'

---

१. अन्नं व्यञ्जन-पुष्पाम्बु-बलिद्रव्यमुदाहृतम्। (जयसिंहकल्पद्रुम)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बलिदानके वास्तविक रहस्यको न जाननेवाले मांसभक्षक निरपराध पशुओंका बलिदानकर घोर पाप करते हैं। वस्तुतः उत्तम कोटिका बलिदान तो 'आत्म-बलिदान' है। आत्म-बलिदानमें मनुष्यको अपने जीवात्माको ही पशु मानकर उसे देवी-देवताके निमित्त समर्पण करना पड़ता है।

ऐतरेयब्राह्मण (६।३) में लिखा है—

'सर्वाभ्यो वा एष देवताभ्य आत्मानमालभते ।'

अर्थात् यज्ञकर्त्ता समस्त देवताओंकी प्रसन्नताके लिये अपने आत्मा (अहङ्कार) को समर्पित करता है।

जो लोग दुर्गाके यथार्थ स्वरूपको न जानकर उसके निमित्त पशुबलि करते हैं, उन्हें पशुबलिकी जगह अपने अहंभावका बलिदान करना चाहिये, न कि निरीह पशुओंका।

प्राचीन धार्मिक इतिहास देखनेसे प्रतीत होता है कि—एक युग ऐसा था जब यज्ञ तथा धार्मिक अनुष्ठानोंके अतिरिक्त भी पशुबलिका प्रावल्य हो गया था और मांस-भक्षणके लोभियोंने धर्मको आडम्बर बनाकर अपनी तृप्तिके लिये हिंसाको प्रचारित किया। ऐसी स्थितिमें कुछ व्रात्यों (संस्कारहीनों) को सनातन वैदिकधर्मपर आक्रमण करनेका अवसर मिला। हिंसाकी आड़ लेकर शास्त्र और वेदोंपर आक्रमण प्रारम्भ हुए और नवीन मिथ्या धर्मोंकी परिकल्पना होने लगी। ऐसी स्थितिमें मुनियों, शास्त्रविदों और मनीषियोंने धर्मरक्षाके निमित्त सात्त्विक वैष्णव यज्ञोंका प्रचार प्रारम्भ किया और पशुबलिके स्थानमें कूष्माण्ड, नारिकेल, इक्षुदण्ड तथा घृत, दधि, मधु इत्यादिकी बनी हुई बलियोंको स्वीकृत किया। इन सात्त्विक अनुष्ठानोंकी प्रतिष्ठा महर्षि वेदव्यासजीने विभिन्न पुराणोंमें की। इनके पश्चात् पशुबलिके आग्रहकी आवश्यकता ही नहीं रह गयी। स्मृतियों और उपनिषदों आदिने भी इन सात्त्विक अनुष्ठानोंका पूर्णतः अनुमोदन ही किया।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अतः मनुष्यमात्रको देवी-देवताके निमित्त पशुबलि नहीं करनी चाहिये। जो मनुष्य देवी-देवताके निमित्त पशुबलि करते हैं, उन्हें अवश्य ही पाप लगता है। इसलिये 'अहिंसा परमो धर्मः' के अनुसार सबको अहिंसारूपी धर्मका पालन करते हुए दुर्गाकी उपासना करनी चाहिये।

ब्राह्मणके लिये पशुबलिका निषेध

ब्राह्मण परम सात्त्विक कहा गया है। अतः ब्राह्मणको देवी-देवताके बलिदानमें सर्वदा कूष्माण्ड, श्रीफल और उड़द आदि सात्त्विक द्रव्यका ही उपयोग करना चाहिये, बकरा आदि पशुओंका नहीं।

ब्राह्मणेन सदा देयं कूष्माण्डं बलिकर्मणि।
श्रीफलं वा सुराधीश! छेदं नैव तु कारयेत्॥

(कालिकापुराण)

'हे सुराधीश! ब्राह्मण सर्वदा बलिकर्ममें कूष्माण्ड अथवा श्रीफल (नारिकेल) को प्रदान करे, किन्तु वह इनका छेदन (कर्तन) न करे।'

'माषान्नेन बलिर्देयो ब्राह्मणेन विजानता।'

(कालिकापुराण)

'मर्मज्ञ ब्राह्मणको उड़दका ही बलिदान करना चाहिये।'

अतः स्पष्ट है कि ब्राह्मणोंको सर्वदा सात्त्विक द्रव्यसे ही देवी-देवताका पूजन और बलिदान करना चाहिये।

'द्रव्येण सात्त्विकेनैव ब्राह्मणः पूजयेच्छिवाम्।'

सर्वसाधारणके लिये बलिदानका विचार

रम्भेक्षु नारिकेलं च गुवाकं कण्टकीफलम्।
उर्वारुकं करञ्जं च छेदयेच्छुरिकादिना॥

(कालिकापुराण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'केला, इक्षुदण्ड, नारिकेल, गुबाक (सुपारी), कण्टकीफल (कटहर), ककड़ो और करौंदा—इनको छूरी आदिसे छेदकर देवी-देवताओंके निमित्त बलिदान किया किया जा सकता है।'

ब्राह्मणके लिये मद्य और रुधिर देवताओंको समर्पित करनेका निषेध

मद्यं दत्त्वा ब्राह्मणस्तु ब्राह्मण्यादेव हीयते।
स्वगात्ररुधिरं दत्त्वा ब्रह्महत्यामवाप्नुयात्॥

(कालिकापुराण)

'जो ब्राह्मण देवपूजनमें देवी-देवताओंको मद्य समर्पित करता है, वह ब्राह्मणत्वसे च्युत हो जाता है और जो अपने शरीरके रुधिरको समर्पण करता है, वह ब्रह्महत्याको प्राप्त होता है।'

ब्राह्मणो मदिरां दत्त्वा ब्राह्मण्यादेव हीयते।
स्वगात्ररुधिरं दत्त्वा ब्रह्महत्यामवाप्नुयात्॥

(भैरवतन्त्र)

'ब्राह्मणो मदिरां दत्त्वा ब्राह्मण्यादेव हीयते।'

(बृहत्सङ्गमतन्त्र)

ब्राह्मणको देवी-देवताओंके निमित्त मद्य समर्पित करनेके लिये स्पष्ट निषेध लिखा है—

'वरं प्राणाः प्रगच्छन्तु ब्राह्मणो नार्पयेत् सुराम्।'

'ब्राह्मणका प्राण भले ही चला जाय, किन्तु वह देवी–देवताको मद्य समर्पित न करे।'

जो लोग वर्णाश्रमोचित धर्मका विचार न कर देवी-देवताकी पूजामें मांस, रक्त और मदिराका उपयोग करते हैं, उनकी निश्चित ही अधोगति होती है, यह स्पष्ट लिखा है—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आवाभ्यां पिशितं रक्तं सुरां वापि महेश्वरि ।
वर्णाश्रमोचितं धर्ममविचार्यार्पयन्ति ये ॥
भूत-प्रेत-पिशाचास्ते भवन्ति ब्रह्मराक्षसाः ॥

(अगस्त्यसंहिता-तन्त्र)

'हे माहेश्वरी ! जो लोग वर्णाश्रमोचित धर्मको न विचार कर हम दोनोंको मांस, रक्त और सुरा समर्पित करते हैं, वे भूत, प्रेत, पिशाच और ब्रह्मराक्षस होते हैं ।'

अतः सभीको विशेषतः ब्राह्मणोंको देवी-देवताओंके निमित्त भूलकर भी मद्य और रक्त समर्पित नहीं करना चाहिये ।

बलिदानके लिये छाग (बकरा) के प्रतिनिधि द्रव्य

कूष्माण्डमिक्षुदण्डञ्च मद्यं सारद्यमेव च ।
एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः सदा ॥

(कालिकापुराण)

'कूष्माण्ड, इक्षुदण्ड, मद्य और सारद्य (मद्य-मांसकी तरह) ये सभी बलिदानके सदृश कहे गये हैं और ये सभी तृप्तिमें छाग (बकरे) के सदृश कहे गये हैं ।'

बलिदानके लिये मद्यके प्रतिनिधि द्रव्य

अवश्यं विहितं यत्र मद्यं तत्र द्विजः पुनः ।
नारिकेलजलं कांस्ये ताम्रे वा विसृजेन्मधु ॥

(कालिकापुराण)

'जहाँ मदिरा प्रदान करना आवश्यक है, वहाँ द्विज कांसेके पात्रमें नारिकेलके जलको अथवा तांबेके पात्रमें शहदको समर्पित करे ।'

यत्रावश्यं विनिर्दिष्टं मदिरापानपूजनम् ।
ब्राह्मणस्ताम्रपात्रे च मधुमद्यं प्रकल्पयेत् ॥

(कुलचूडामणितन्त्र)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'जहाँ पूजनमें मदिरा-पानका अवश्य निर्देश किया गया है, वहाँ ब्राह्मण ताम्रपात्रमें मधुको डालकर अर्पित करे।'

सुराभावे च गोक्षीरं द्विजो दद्याद् युगे युगे।
द्रव्याभावे चानुकल्पैः पूजयेत् परदेवताम्॥

(निरुक्ततन्त्र, पञ्चमपटल)

'द्विज प्रत्येक युगमें मदिराके अभावमें गोदुग्ध दे और अन्य द्रव्योंके अभावमें उनके अनुकल्प (प्रतिनिधि) द्रव्योंसे परदेवताका पूजन करे।'

शतचण्डी आदिके लिये प्रशस्त मास, तिथि, वार और नक्षत्र

मास

वैशाखः फाल्गुनो माघः श्रावणो मार्ग एव च।
आश्विनः कार्तिको मासाः पूजायां तु शुभावहाः॥

तिथि

तृतीया पञ्चमी पूर्णा सप्तमी च त्रयोदशी।
दशमी द्वादशी षष्ठो चतुर्थी नवमी तथा॥
कृष्णाष्टमी चतुर्दश्यौ तिथयः सर्वकामदाः॥

वार

रविर्बृहस्पतिः सोमो बुधः शुक्रः शुभावहाः।

नक्षत्र

अश्विनी रोहिणी स्वाती पौष्णं ज्येष्ठोत्तरात्रयम्।
पुष्यं पुनर्वसु भानि श्रेष्ठानि शक्तिपूजने॥

दुर्गाके कुछ महत्त्वपूर्ण सम्पुट-मन्त्र

(१) विपत्ति-नाशके लिये

शरणागतदीनार्तपरित्राणपरायणे।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(२) भय–नाशके लिये

(क) सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥

(ख) एतत्ते वदनं सौम्यं लोचनत्रयभूषितम् ।
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥

रोग–नाशके लिये

रोगानशेषानपहंसि तुष्टा
रुष्टा तु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥

शत्रु–नाशके लिये

सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद् वैरिविनाशनम् ॥

महामारी-नाशके लिये

जयन्ती मङ्गला काली भद्रकाली कपालिनी ।
दुर्गा क्षमा शिवा धात्री स्वाहा स्वधा नमोऽस्तु ते ॥

सब प्रकारके कल्याणके लिये

सर्वमङ्गलमङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥

सभी प्रकारके शूलोंको दूर करनेके लिये

शूलेन पाहि नो देवि पाहि खड्गेन चाम्बिके ।
घण्टास्वनेन नः पाहि चापज्यानिःस्वनेन च ॥

पत्नीकी प्राप्तिके लिये

पत्नीं मनोरमां देहि मनोवृत्तानुसारिणीम् ।
तारिणीं दुर्गसंसारसागरस्य कुलोद्भवाम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वविध बाधाओंसे मुक्ति और धन-पुत्रादिकी प्राप्तिके लिये

सर्वाबाधाविनिर्मुक्तो धनधान्यसुतान्वितः।
मनुष्यो मत्प्रसादेन भविष्यति न संशयः॥

विविध दुर्गा-गायत्री

१. कात्यायन्यै विद्महे कन्यकुमार्यै धीमहि।
तन्नो दुर्गिः प्रचोदयात्॥
(तैत्तिरीयारण्यक १०।१)

२. कात्यायनाय विद्महे कन्याकुमारी च धीमहि।
तन्नो दुर्गिः प्रचोदयात्॥
(तैत्तिरीयोपनिषत्)

३. कात्यायनाय विद्महे कन्यकुमारी च धीमहि।
तन्नो दुर्गिः प्रचोदयात्॥
(नारायणोपनिषत् ७)

४. कात्यायन्यै विद्महे कन्याकुमार्यै धीमहि।
तन्नो दुर्गाः प्रचोदयात्॥
(लिङ्गपुराण, उत्तरार्ध ४८।२६)

५. कात्यायन्यै विद्महे [1]कन्यकुमारी च धीमहि।
तन्नो दुर्गिः प्रचोदयात्॥

६. महादेव्यै विद्महे दुर्गायै धीमहि।
तन्नो देवी प्रचोदयात्॥

---

१. कन्या चासौ कुमारी कन्यकुमारी।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुर्गापूजन-सामग्री

रौली
मौली
धूपवत्ती
केशर
कपूर
रूई
अबीर (गुलाल)
बुक्का(अभ्रक)
सिन्दूर
चावल
पान
सुपारी
पेड़ा
बतासा
ऋतुफल
दुग्ध
दही
घृत
चीनी
सहत
यज्ञोपवीत
अतरकी शीशी
गुलाबजलकी शीशी
पंचमेवा
मिश्री
गङ्गाजल
पुष्पमाला
पुष्प फुटकर
तुलसी
दूर्वा
बिल्वपत्र
कमलके पुष्प
इलायची छोटी
लवंग
जावित्री
जायफल
नारियल
गिरिके गोले
पंचपल्लव
पंचरङ्ग
कलश ताम्रका
थाली
कटोरी
धोती जनानी
सिंहासन
छत्र
चंवर
पंचपात्र
आचमनी
अर्घा
तष्टा
कमण्डलु
रुद्राक्षकी माला
घण्टा
घड़ोल
शङ्ख

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शतचण्डी-सामग्री

- रोली
- मौली
- धूपवत्ती
- केशर
- कपूर
- रूई
- अबीर
- बुक्का (अभ्रक)
- सिन्दूर
- चावल ५ कीलो
- पान
- सुपारी ४ कीलो
- पेड़ा
- बतासा
- ऋतुफल
- गोबर
- गोमूत्र
- दुग्ध
- दही
- घृत
- चीनी
- सहत
- यज्ञोपवीत
- अतरकी शीशी
- गुलाबजलकी शीशी
- पंचमेवा
- मिश्री
- गङ्गाजल
- पुष्पमाला
- फुटकर पुष्प
- तुलसी
- दूर्वा
- बिल्वपत्र
- कमलके पुष्प
- इलायची छोटी
- लवंग
- जावित्री
- जायफल
- गिरिके गोले
- नारियल
- लाल रंग
- पीला रंग
- काला रंग
- हरा रंग
- आम्रपत्र
- गूलरपत्र
- पाकरपत्र
- वटपत्र
- पीपलपत्र
- पञ्चरत्नकी पुड़िया ५
- सर्वौषधि
- सप्तमृत्तिका

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मेंहदी पीसी
हलदी पीसी
सुरवारीका बीया
कालीमिर्च
गुरुच
पीली सरसों
लाल चन्दन
अनार
पालकका साग
खोवा
तेल सुगन्धित
उड़द काला
पापड़
काष्ठकी चौंकी ५
काष्ठका पाटा ३
लोहेकी कंटिया ४
केलेके स्तम्भ ८
कंबल ऊनी १
सूतकी डोरी १० हाथ
नवग्रहकी लकड़ी—
मदारकी लकड़ी १०८
पलाशकी लकड़ी १०८
खैरकी लकड़ी १०८
अपामार्गकी लकड़ी १०८
पीपलकी लकड़ी १०८
गूलरकी लकड़ी १०८
शमीकी लकड़ी १०८
दूर्वा १०८
कुशा १०८

कलश चाँदीका अथवा ताम्रका १
कमण्डलु (झारी) ताँबेका १
थाली २
थाली काँसेकी १
कटोरा कांसेका बड़ा १
कटोरी ५
तस्तरी ६
कांसेकी कटोरी (छायापात्र) २
पूर्णपात्र (बघोना) १
बघोना (खीर पकानेके लिये) १
कड़छुल पीतलकी १
आरतीदानी १
धूपदानी १
घण्टा १
घड़ौल १
शङ्ख १
जनानी साड़ी रेशमी १
जनानी धोती ३
मर्दानी धोती ७
अंगोछा ७
रेशमी जनाना ओढ़ना १
कब्जा १
रेशमी चुंदड़ी १
सफेद कपड़ा गज ४
लाल कपड़ा गज १।
बन्दरवाल १
पचरंगा ध्वजा १
पचरंगा चँदवा बड़ा १
चँदवा छोटे ४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सौभाग्यपिटारी १
शीशा १
दुर्गाकी फोटो बड़ी १
दुर्गाकी सुवर्णकी मूर्ति १। तोलेकी १
सुवर्णकी नथ १
सुवर्णकी माला १
सुवर्णकी शलाका १
सुवर्णके टुकड़े २१
चाँदीका सिंहासन १
चाँदीका छत्र १
चाँदीका चमर १
चाँदीकी थाली १
चाँदीकी कटोरी २
चाँदीका पंचपात्र १
चाँदीका अर्घा १
चाँदीका तष्टा १
चाँदीकी आचमनी १
चाँदीका चौकोर पत्र (१६ अंगुल लम्बा और चौड़ा) १
रुद्राक्षकी माला १
वरण-सामग्री—
धोती
दुपट्टा
अंगोछा
बनियाइन
लोटा
गिलास
पञ्चपात्र
आचमनी
गोमुखीमाला
खड़ाऊँ
दुर्गाकी पुस्तक
आसन
आचार्यके लिये विशिष्ट वरणसामग्र
हवन-सामग्री—
तिल २५ सेर
चावल १२॥ सेर
जौ ६॥ सेर
चीनी ३। सेर
घृत ५ सेर
पञ्चमेवा २ पाव
कमलगट्टा २ पाव
गुग्गुल १। पाव
भोजपत्र १। पाव
चन्दनका चूरा २ पाव
आमकी लकड़ी २ मन
गोयठा (कण्डा) २०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जगज्जननीसे !

हो परम बन्धु तुम पतितोंकी, तुम दीनोंकी रखवाली हो,
जिसका अपना कोई न रहा, तुम उसकी निज घरवाली हो।
जो है सब जगसे निराश, तुम उसको आशा देती हो,
जो आता शरण तुम्हारी है, तुम उसको आश्रय देती हो।
जो मनसे तुमको याद करे, तुम उसके मनमें रमती हो,
जो भयसे तुमको याद करे, तुम उसको निर्भय करती हो।
जो पापी तुमको याद करे, तुम उसको पावन करती हो,
जो तुम पर निर्भर रहता है, तुम उसको निर्भय करती हो।
जो विश्वास तुम्हारा करता है, तुम शान्ति-सनातन देती हो,
जो दीन तुम्हारे द्वार खड़ा, तुम उससे हृदय मिलाती हो।
जो पतित तुम्हारे साथ लड़े, तुम उसको सद्गति देती हो,
तुम सबकी सुहृद अहैतुक हो, तुम सबकी अन्तर्यामिनि हो।
तुम सबकी नित्य आत्मा हो, तुम सबकी सच्ची स्वामिनि हो,
तुम निश्चय सबकी जीवन हो, तुम निश्चय सबकी सब-कुछ हो।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हमारे अन्य महत्त्वपूर्ण ग्रन्थ

1. **अर्थसंग्रहः**। (मीमांसा) लौगाक्षि भास्कर कृत। पट्टाभिराम शास्त्री कृत 'अर्थालोक' संस्कृत टीका। हिन्दी व्याख्याकार-वाचस्पति उपाध्याय। आशीर्वाद- गौरीनाथ शास्त्री। पुरोवाक् विमल कृष्ण मतिलाल (चौ॰ प्रा॰ ग्र॰ 10)
2. **तैत्तिरीयोपनिषद्**। समूलशाङ्करभाष्य एवं 'ज्योति' हिन्दी टीका सहित। व्याख्याकार कन्हैयालाल जोशी (चौ॰ रा॰ ग्र॰ 1)
3. **सामान्य संस्कृत व्याकरण (रचना तथा अनुवाद)**। सम्पादक-रामजी उपाध्याय तथा मनोरमा तिवारी। (गो॰ सं॰ ग्र॰ 16)
4. **हितोपदेश-मित्रलाभ**। (नीति) 'रश्मिकला' संस्कृत-हिन्दी-व्याख्या। व्याख्याकार-केशवदेव शास्त्री, सम्पादक-कपिलदेव गिरि (गो॰ सं॰ ग्र॰ 17)
5. **वेदान्तसारः**। (वेदान्त) श्रीमत्सदानन्दयोगेन्द्र विरचित । (गो॰ सं॰ ग्र॰ 34)
6. **संस्कृत साहित्येतिहासः** । (इतिहास) विश्वनाथ शास्त्री भारद्वाज विरचित। सम्पादक बलिराम शास्त्री भारद्वाज (गो॰ सं॰ ग्र॰ 39)
7. **ऋग्वेदभाष्यभूमिका** (ऋग्वेद) सायणाचार्य विरचित। हिन्दी व्याख्योपेता वी॰ के॰ वर्मा (गो॰ सं॰ ग्र॰ 40)
8. **औचित्यविचारचर्चा**। (अलंकार) क्षेमेन्द्र कृत श्रीनारायणमिश्रकृत मनोरमाख्य संस्कृत हिन्दी व्याख्याद्वयोपेता। (गो॰ सं॰ ग्र॰ 44)
9. **स्वप्नवासवदत्तम्**। (नाटकम्) महाकवि भास। 'वेद' 'प्रकाश' सं. हिन्दी तथा आँग्ल व्याख्योपेतम्। व्याख्याकार –डॉ॰ वेदप्रकाश शास्त्री (गो॰ सं॰ ग्र॰ 62)
10. **लघुसिद्धान्तकौमुदी**। वरदराज प्रणीत। 'आशुबोधिनी' नामक विस्तृत हिन्दी व्याख्या तथा रूपसिद्धि सहित। व्याख्याकार – डॉ॰ सुरेन्द्रदेव स्नातक शास्त्री (गो॰ सं॰ ग्र॰ 63)
11. **अभिज्ञानशाकुन्तलम्**। कालिदासविरचितम्। निर्णयसागरसंस्करणानुसारिपाण्डुतम्। 'मालिनी' संस्कृत तथा हिन्दी व्याख्योपेतम्। व्याख्याकार –डॉ॰ यदुनन्दन मिश्र। (गो॰ सं॰ ग्र॰ 64)
12. **चमत्कारिचिन्तामणिः**। नारायण भट्ट विरचित सुदैवज्ञ धर्मेश्वर मालवीय विरचितया अन्वर्थ दीपिकाख्यया संस्कृत टीकया संवलितः शंकर हिन्दी व्याख्योपेतश्च। व्याख्याकार रमाशङ्कर त्रिपाठी (गो॰ सं॰ ग्र॰ 68)

चौखम्भा ओरियन्टालिया

पोस्ट बॉक्स नं 2206

बंगलो रोड, 9-यू.बी., जवाहर नगर

(किरोड़ीमल कालेज के पास)

दिल्ली - 110007 (भारत)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection